श्रीगणेशायनमः।।देशकालौसंकीर्त्ययजमानेनदृतोहंअमुकगोत्रोत्पन्नस्यअमुकराश्यंतर्गतअमुकनक्षत्रामुकचरणजातस्यामुकशर्मणःव्यवहारनाम्नामुकशर्मणःसंकटाद्यशाजानेतकेशनिरसनपूर्वकसंकटाप्रसादसिध्यर्थंयथामीलितोपचारेर्द्रव्यैःसंकटायोगिनीपूजनपूर्वकंजपंकरिष्ये।।आसनमास्तीर्यउपविश्यभूतशुध्यादिमातृकान्यासांतंकृत्वा॥अस्यश्रीसंकटायोगिनीमंत्रस्य।ईश्वरऋषिः।शिरसि॥गायत्रीछंदसेनमःमुखे।।संकटायोगिन्येदेवतायैहृत्ये।।पूजायांविनियोगः।।करसंपुटेक्रांअंगुष्ठाभ्यां।क्रींतर्जनीभ्यां।क्रूंमध्यमाभ्यां।क्रैंअनामिकाभ्यां।क्रौंकनिष्ठिकाभ्यां।क्रः करतलकरपृष्ठाभ्यां।एवंहृदयादि।।ध्यानं।।ध्यायेदाद्यांत्रिनयनामुद्यदादित्यसंनिभां।।रक्तस्रग्वस्त्रभोजांसिंदूरसंदराधरां।।पद्मद्वयधनुर्बाणान्दधतींभुजषट्केन।।रक्तांजनमंजुमंजीरकांचीगुणविराजितां।।एवंध्यात्वामहेशानिपूजयेदुक्तवस्तुभिः।।इतिध्यात्वामानसैरुपचारैःसंपूज्य।।।।त्रिकोणपंचकोणषट्कोणाष्टदलचतुरस्रात्मकंपूजाचक्रंविलिख्यपीठेस्थाप्यपुष्पंदत्वा।।कलशंसंपूज्यतेवोदकेनात्मानंपूजाद्रव्याणिप्रोक्ष्यपीठपूजांकुर्यात्।जयायैनमः।विजयायै।जयंत्यै।अपराजितायै।नित्यायै।विलासिन्यै।दोग्ध्र्यै।अघोरायै।सर्वमंगलायैनमइतिपीठशक्तीःसंपूज्य।क्रींसर्वशक्तिकमलासनायनमइतिपीठंसंपूज्यापूर्वोक्तप्रकारेणयोगिनींध्यात्वामानसोपचारैःसंपूज्यभंजलौपुष्पाणिगृहीत्वातत्रयोगिनीमागतांध्यात्वायंत्रेआवाहयामीत्यादिमुद्राःआसनादिपुष्पांतमभ्यर्च्य।।मूलमुच्चार्य।संकटायैआसनंकल्पयामि।।मूलं।संकटायैपाद्यंक।मूलंसंकटायैअर्घ्यंक।मूलंसंकटायैआचमं।मूलंसंकटायैमधुपर्कं।मूलंसंकटायैस्नानं।आचमनीयं।मूलंसंकटायैवस्त्रंक।।आचमनीयं।मूलंसंकटायैगंधंक।।मूलंसंकटायैपुष्पं।।अथावरणपूजांकुर्यात्।त्रिकोणांतःविरूढयोगिन्याःपरितस्तासांमंत्रानुक्तास्ताःपूजयेत्।।यथा।।त्रिकोणाग्रेपुस्त्वाद्याद्याद्रा

क्षिण्येन।इच्छायैनमः।ज्ञानायै।क्रियायै इति संपूज्य।अथ पंचकोणेषु।कामराजायनमः।मन्मथाय।कंदर्पाय।मकरकेतनाय।मनोभवाय॥अथ षट्कोणेषु।हृदयदेव्यै।शिरोदेव्यै।शिखादेव्यै।कवचदेव्यै।नेत्रदेव्यै।अस्त्रदेव्यै॥अष्टदले॥ब्राह्म्यै।माहेश्वर्यै।कौमार्यै।वैष्णव्यै।वाराह्यै।इंद्राण्यै।चामुंडायै।महालक्ष्म्यै॥चतुरस्रे॥इंद्राय।अग्नये।यमाय।निर्ऋतये।वरुणाय।वायवे।कुबेराय।ईशानाय।वज्राय।शक्तये।दंडाय।खड्गाय।पाशाय।अंकुशाय।गदायै।त्रिशूलाय॥मूलसंकटादेव्यै धूपं।मूलसंकटादेव्यै दीपं।मूलसंकटादेव्यै नैवेद्यं।नैवेद्यमध्ये पानीयं।उत्तरापोशनं।हस्तप्रक्षालनं।मुखप्रक्षालनं।करोद्वर्तनं।मूलं।सुवर्णपुष्पदक्षिणा।नीराजनं प्रदक्षिणानमस्काराः।पूर्वादिचतुर्दिक्षु चतुरस्रवृत्तत्रिकोणात्मकानि मंडलानि विलिख्य।चतुर्विधेषु सव्यंजनं नभिधारितानोदनान्निधाय।पूर्वमंडलेयंयोगिनीभ्यो नमइति गंधपुष्पादिभिः संपूज्य॥एषबलिर्योगिनीभ्यो नमइति बलिं समर्प्य।दक्षिणमंडलेक्षेत्रपालायनमइतिक्षेत्रपालंप्राग्वत्संपूज्यएषबलिःक्षेत्रपालायनमइतिबलिंसमर्पयेत्॥पश्चिममंडलेबटुकायनमइतिप्राग्वत्बटुकंसंपूज्यएषबलिर्बटुकायनमइतिबलिंसमर्पयेत्॥उत्तरमंडलेगंगणपतयेनमइतिपूर्ववत्संपूज्यएषबलिर्गणपतयेनमइतिबलिंदद्यात्॥ततःपूर्वोक्तऋष्यादिन्यासंकृत्वा मांमालेतिमालांप्रार्थ्य॥सौः क्लीं संकटेरोगंमेनाशयनाशयनमः इतिमूलमंत्रमष्टोत्तरसहस्रंजप्त्वा॥ततोमंगलादिसप्तयोगिनीमंत्रान्प्रत्येकमष्टोत्तरशतमष्टोत्तरशतंजप्त्वापुनःऋष्यादिध्यानांतंप्राग्वत्कृत्वाजघातिजुघेतिजपंसमर्प्य।नित्याकवचंपठित्वा।असाध्यसाधकंसाधकंमेयद्यदाचरितंमया॥तत्सर्वंकृपयादेविगृहाणाराधनंममेतिदृढांसमर्प्यैष्टंप्रार्थयेत्॥॥अथमंगलादियोगिनीनांमंत्राः॥॥क्लीं मंगलेमंगलालयेस्वाहा॥ह्रीं आपिंगलेवैरिवारिणिप्रसीद॥श्रीं धनदधन्येस्वाहा॥ऐं भ्रामरिजगतांमहेश्वरिभ्रामयक्लीं॥ह्रूं भद्रिकेममभद्रंदेहिदेहिअभद्राणिनाशयनाशयस्वाहा॥ॐ ऊल्केममरोगंनाशयजंभय॥सौः सिद्धेमेसर्वमानसंसाधयसाधयनमः॥॥इतिमंगलादियोगिनीनांसप्तमंत्राः॥॥ ६

श्रीगणेशायनमः॥अथनित्याकवचं॥समस्तापद्विमुक्त्यर्थंसर्वसंपत्प्रदायिने॥भूतप्रेतपिशाचादिपीडाशांत्यैसुखायमे १ समस्तरोगनाशायसमरेविजयायच॥चोरसिंहद्वीपिगजगवयादिभयानके २ अरण्येशैलगहनेमार्गेदुर्भिक्षकेतथा॥सलिलाग्निमरुत्पीडास्वधोपोतास्सिकटे ३ प्रजप्यानित्याकवचंसकृत्सर्वंतरत्यसौ॥सरवी जीवतिनिर्द्वेषोनिःसपत्नोजितेंद्रियः ४ शृणुतत्कवचंदेविवक्ष्येतवतवात्मकं॥येनाहमपियुद्धेषुदेवासुरजयीसदा॥५॥सर्वदःसर्वदात्मानंललितापातुसर्वगा॥कामेशीजघनंपातुभगमालाबनंतरा॥दिशंपातुतथादक्षपार्श्वेमेपातुसर्वदा॥नित्यक्लिन्नानाथभेरुंडादिशंपातुसदाममः॥३॥तथैवपश्चिमंभागंरक्षेत्सावह्निवासिनी॥महावज्रेश्वरीरक्षेदनंतरदिशंसदा॥४॥वामपार्श्वेसदापातुदूतीमेत्वरितातथा॥पालयेत्तुदिशंवान्यांरक्षेन्मांकुलसुंदरी॥५॥नित्यामामूर्ध्वतःपातुसाधोमेपातुसर्वदा॥नित्यानीलपताकाचविजयासर्वतश्चमां ६ करोतुमेमंगलानिसर्वदासर्वमंगला॥देहेंद्रियमनःप्राणान्ज्वालामालिनिदीप्तहा ७ पालयेदनिशंचित्राचित्तंमेपातुसर्वदा॥कामाक्रोधात्तथालोभान्मोहान्मायान्मदादपि ८ पायात्मत्सरतःशोकात्संशयात्सर्वतःसदा॥स्तेम्यात्चसेमयोगादशुभेभ्यस्तुसकर्मरू ९ असत्याक्रूरचित्तातोसिंसातश्चौर्यतस्तथा॥रक्षंतुमांसर्वदानाकुर्वंतिलोंशभेषुच॥१०॥नित्याःबोउशमांपातुगजारूढासशक्तिभिः॥तथाहयसमारूढापातुमांसर्वतःसदा॥ १५॥सिंहारूढासथापातुमांतुरक्षुगताअपि॥रथा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

रूढाश्वमांपांतुसर्वतःसर्वदारणे।।तार्क्ष्यारूढाश्वमांपांतुतथाव्योमगतास्तथा।।भूतगाःसर्वगाःपांतुमांस
र्वत्रचसर्वदा।।भूतप्रेतपिशाचापस्मारकृतादिकान्ग्रहान्।।द्रावयंतुखशक्तीनांभूषणैरायुधैर्मम।।गजा
श्वहरीपिपंचास्यतार्क्ष्यारूढादित्यायुधाः।।असंख्याःशक्तयोरव्याःपांतुमांसर्वतःसदा।।सायंप्रातर्जपे
न्नित्याकवचंसर्वरक्षकं।।कदाचिन्नाशुभंपश्येन्नश्रृणोतिचमत्समः।। ।।इतितंत्रराजेनित्याकवचंसंपूर्णं
माहादेवोजयति